॥ अथ पशुपत्यष्टकम्॥

ध्यानम् ।

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ।
पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्वबीजं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥

स्तोत्रम् ।

पशुपतीन्दुपतिं धरणीपतिं भुजगलोकपतिं च सती पतिम्॥
गणत भक्तजनार्ति हरं परं भजत रे मनुजा गिरिजापतिम् ॥१॥
न जनको जननी न च सोदरो न तनयो न च भूरिबलं कुलम्॥
अवति कोऽपि न कालवशं गतं भजत रे मनुजा गिरिजापतिम् ॥२॥
मुरजडिण्डिवाद्यविलक्षणं मधुरपञ्चमनादविशारदम्॥
प्रथमभूत गणैरपि सेवितं भजत रे मनुजा गिरिजापतिम् ॥३॥
शरणदं सुखदं शरणान्वितं शिव शिवेति शिवेति नतं नृणाम्॥
अभयदं करुणा वरुणालयं भजत रे मनुजा गिरिजापतिम् ॥४॥
नरशिरोरचितं मणिकुण्डलं भुजगहारमुदं वृषभध्वजम्॥
चितिरजोधवली कृत विग्रहं भजत रे मनुजा गिरिजापतिम् ॥५॥
मुखविनाशङ्करं शशिशेखरं सततमध्वरं भाजि फलप्रदम्॥
प्रलयदग्धसुरासुरमानवं भजत रे मनुजा गिरिजापतिम् ॥६॥
मदम पास्य चिरं हृदि संस्थितं मरण जन्म जरा भय पीडितम्॥
जगदुदीक्ष्य समीपभयाकुलं भजत रे मनुजा गिरिजापतिम् ॥७॥
हरिविरिञ्चिसुराधिंप पूजितं यमजनेशधनेशनमस्कृतम्॥
त्रिनयनं भुवन त्रितयाधिपं भजत रे मनुजा गिरिजापतिम् ॥८॥
पशुपतेरिदमष्टकमद्भुतं विरिचित पृथिवी पति सूरिणा॥
पठति संशृनुते मनुजः सदा शिवपुरिं वसते लभते मुदम् ॥९॥